# Santanagopala Stotram

# સન્તાનગોપાલસ્તોત્રમ્

## Document Information

Text title : Santanagopala stotram with Mantravidhi

File name : santaanagopaala.itx

Category : vishhnu, krishna, stotra, vishnu, shataka, harivaMsha

Location : doc_vishhnu

Transliterated by : Anuradha

Proofread by : Anuradha, PSA Easwaran

Latest update : January 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2023

*sanskritdocuments.org*

# સન્તાનગોપાલસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
અસ્ય શ્રીસન્તાનગોપાલમન્ત્રસ્ય શ્રીનારદ ઋષિઃ, અનુષ્ટુપ્ છન્દઃ,
શ્રીકૃષ્ણો દેવતા, ગ્લૌં બીજમ્, નમઃ શક્તિઃ, પુત્રાર્થે જપે વિનિયોગઃ ।
અઙ્ગન્યાસઃ ।
દેવકીસુત ગોવિન્દ" હૃદયાય નમઃ ।
વાસુદેવ જગત્પતે શિરસે સ્વાહા ।
દેહિ મે તનયં કૃષ્ણ" શિખાયૈ વષટ્ ।
ત્વામહં શરણં ગતઃ - ૐ નમઃ" અસ્ત્રાય ફટ્ ।
ધ્યાનં -
વૈકુણ્ઠાદાગતં કૃષ્ણં રથસ્થં કરુણાનિધિમ્ ।
કિરીટિસારથિં પુત્રમાનયન્તં પરાત્પરમ્ ॥ ૧॥

આદાય તં જલસ્થં ચ ગુરવે વૈદિકાય ચ ।
અર્પયન્તં મહાભાગં ધ્યાયેત્ પુત્રાર્થમચ્યુતમ્ ॥ ૨॥

મૂલ મન્ત્રં -
ૐ શ્રીં હ્રીં ક્લીં ગ્લૌં દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥

( ૨) સન્તાનગોપાલમન્ત્રઃ
વિનિયોગઃ -
અસ્ય શ્રીસન્તાનગોપાલમન્ત્રસ્ય બ્રહ્મા ઋષિર્ગાયત્રીચ્છન્દઃ,
શ્રીકૃષ્ણો દેવતા, ક્લીં બીજમ્, નમઃ શક્તિઃ પુત્રાર્થે જપે વિનિયોગઃ ।
અઙ્ગન્યાસઃ
ગ્લૌં હૃદયાય નમઃ ।
ક્લીં શિરસે સ્વાહા ।
હ્રીં શિખાયૈ વષટ્ ।

શ્રીં કવચાય હુમ્ ।
ૐ અસ્ત્રાય ફટ્ - ઇતિ દિગ્બન્ધઃ

ધ્યાનં –
શઙ્ખચક્રગદાપદ્મં દધાનં સૂતિકાગૃહે ।
અઙ્કે શયાનં દેવક્યાઃ કૃષ્ણં વન્દે વિમુક્તયે ॥

મૂલમન્ત્રં –
ૐ નમો ભગવતે જગદાત્મસૂતયે નમઃ" ।
વિનિયોગઃ –
ૐ અસ્ય શ્રીસન્તાનગોપાલમન્ત્રસ્ય શ્રીનારદ ઋષિઃ, અનુષ્ટુપ્ છન્દઃ,
શ્રીકૃષ્ણો દેવતા, ગ્લૌં બીજમ્, નમઃ શક્તિઃ।, પુત્રાર્થે જપે વિનિયોગઃ ।
અઙ્ગન્યાસઃ
દેવકીસુત ગોવિન્દ હૃદયાય નમઃ ।
વાસુદેવ જગત્પતે" શિરસે સ્વાહા ।
"દેહિ મે તનયં કૃષ્ણ શિખાયૈ વષટ્ ।
ત્વામહં શરણં ગતઃ" કવચાય હુમ્ ।
"દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ "અસ્ત્રાય ફટ્ ।
ધ્યાનં –
શઙ્ખચક્રગદાપદ્મં ધારયન્તં જનાર્દનમ્ ।
અઙ્કે શયાનં દેવક્યાઃ સૂતિકામન્દિરે શુભે ॥

એવં રૂપં સદા કૃષ્ણં સુતાર્થં ભાવયેત્ સુધીઃ ॥

સન્તાનગોપાલ મૂલ મન્ત્રં –
ૐ શ્રીં હ્રીં ક્લીં ગ્લૌં દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
ૐ દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥

ૐ નમો ભગવતે વાસુદેવાય ।

અથ સન્તાનગોપાલસ્તોત્રમ્ ।
શ્રીશં કમલપત્રાક્ષં દેવકીનન્દનં હરિમ્ ।
સુતસમ્પ્રાપ્તયે કૃષ્ણં નમામિ મધુસૂદનમ્ ॥ ૧॥

નમામ્યહં વાસુદેવં સુતસમ્પ્રાપ્તયે હરિમ્ ।

યશોદાઙ્કગતં બાલં ગોપાલં નન્દનન્દનમ્ ॥ ૨॥

અસ્માકં પુત્રલાભાય ગોવિન્દં મુનિવન્દિતમ્ ।
નમામ્યહં વાસુદેવં દેવકીનન્દનં સદા ॥ ૩। ॥

ગોપાલં ડિમ્ભકં વન્દે કમલાપતિમચ્યુતમ્ ।
પુત્રસમ્પ્રાપ્તયે કૃષ્ણં નમામિ યદુપુઙ્ગવમ્ ॥ ૪॥

પુત્રકામેષ્ટિફલદં કઞ્જાક્ષં કમલાપતિમ્ ।
દેવકીનન્દનં વન્દે સુતસમ્પ્રાપ્તયે મમ ॥ ૫॥

પદ્માપતે પદ્મનેત્ર પદ્મનાભ જનાર્દન ।
દેહિ મે તનયં શ્રીશ વાસુદેવ જગત્પતે ॥ ૬॥

યશોદાઙ્કગતં બાલં ગોવિન્દં મુનિવન્દિતમ્ ।
અસ્માકં પુત્રલાભાય નમામિ શ્રીશમચ્યુતમ્ ॥ ૭॥

શ્રીપતે દેવદેવેશ દીનાર્તિહરણાચ્યુત ।
ગોવિન્દ મે સુતં દેહિ નમામિ ત્વાં જનાર્દન ॥ ૮॥

ભક્તકામદ ગોવિન્દ ભક્તં રક્ષ શુભપ્રદમ્ ।
દેહિ મે તનયં કૃષ્ણ રુક્મિણીવલ્લભ પ્રભો ॥ ૯॥

રુક્મિણીનાથ સર્વેશ દેહિ મે તનયં સદા ।
ભક્તમન્દાર પદ્માક્ષ ત્વામહં શરણં ગતઃ ॥ ૧૦॥

દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૧૧॥

વાસુદેવ જગદ્વન્દ્ય શ્રીપતે પુરુષોત્તમ ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૧૨॥

કઞ્જાક્ષ કમલાનાથ પરકારુણિકોત્તમ ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૧૩॥

લક્ષ્મીપતે પદ્મનાભ મુકુન્દ મુનિવન્દિત ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૧૪॥

કાર્યકારણરૂપાય વાસુદેવાય તે સદા ।
નમામિ પુત્રલાભાર્થં સુખદાય બુધાય તે ॥ ૧૫॥

રાજીવનેત્ર શ્રીરામ રાવણારે હરે કવે ।
તુભ્યં નમામિ દેવેશ તનયં દેહિ મે હરે ॥ ૧૬॥

અસ્માકં પુત્રલાભાય ભજામિ ત્વાં જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ વાસુદેવ રમાપતે ॥ ૧૭॥

શ્રીમાનિનીમાનચોર ગોપીવસ્ત્રાપહારક ।
દેહિ મે તનયં કૃષ્ણ વાસુદેવ જગત્પતે ॥ ૧૮।
અસ્માકં પુત્રસમ્પ્રાપ્તિં કુરુષ્વ યદુનન્દન ।
રમાપતે વાસુદેવ મુકુન્દ મુનિવન્દિત ॥ ૧૯॥

વાસુદેવ સુતં દેહિ તનયં દેહિ માધવ ।
પુત્રં મે દેહિ શ્રીકૃષ્ણ વત્સં દેહિ મહાપ્રભો ॥ ૨૦॥

ડિમ્ભકં દેહિ શ્રીકૃષ્ણ આત્મજં દેહિ રાઘવ ।
ભક્તમન્દાર મે દેહિ તનયં નન્દનન્દન ॥ ૨૧॥

નન્દનં દેહિ મે કૃષ્ણ વાસુદેવ જગત્પતે ।
કમલાનાથ ગોવિન્દ મુકુન્દ મુનિવન્દિત ॥ ૨૨॥

અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
સુતં દેહિ શ્રિયં દેહિ શ્રિયં પુત્રં પ્રદેહિ મે ॥ ૨૩॥

યશોદાસ્તન્યપાનજ્ઞં પિબન્તં યદુનન્દનમ્ ।
વન્દેઽહં પુત્રલાભાર્થં કપિલાક્ષં હરિં સદા ॥ ૨૪॥

નન્દનન્દન દેવેશ નન્દનં દેહિ મે પ્રભો ।
રમાપતે વાસુદેવ શ્રિયં પુત્રં જગત્પતે ॥ ૨૫॥

પુત્રં શ્રિયં શ્રિયં પુત્રં પુત્રં મે દેહિ માધવ ।
અસ્માકં દીનવાક્યસ્ય અવધારય શ્રીપતે ॥ ૨૬॥

ગોપાલડિમ્ભ ગોવિન્દ વાસુદેવ રમાપતે ।
અસ્માકં ડિમ્ભકં દેહિ શ્રિયં દેહિ જગત્પતે ॥ ૨૭॥

મદ્વાઞ્છિતફલં દેહિ દેવકીનન્દનાચ્યુત ।
મમ પુત્રાર્થિતં ધન્યં કુરુષ્વ યદુનન્દન ॥ ૨૮॥

યાચેઽહં ત્વાં શ્રિયં પુત્રં દેહિ મે પુત્રસમ્પદમ્ ।
ભક્તચિન્તામણે રામ કલ્પવૃક્ષ મહાપ્રભો ॥ ૨૯॥

આત્મજં નન્દનં પુત્રં કુમારં ડિમ્ભકં સુતમ્ ।
અર્ભકં તનયં દેહિ સદા મે રઘુનન્દન ॥ ૩૦॥

વન્દે સન્તાનગોપાલં માધવં ભક્તકામદમ્ ।
અસ્માકં પુત્રસમ્પ્રાપ્ત્યૈ સદા ગોવિન્દમચ્યુતમ્ ॥ ૩૧॥

ૐકારયુક્તં ગોપાલં શ્રીયુક્તં યદુનન્દનમ્ ।
ક્લીંયુક્તં દેવકીપુત્રં નમામિ યદુનાયકમ્ ॥ ૩૨॥

વાસુદેવ મુકુન્દેશ ગોવિન્દ માધવાચ્યુત ।
દેહિ મે તનયં કૃષ્ણ રમાનાથ મહાપ્રભો ॥ ૩૩॥

રાજીવનેત્ર ગોવિન્દ કપિલાક્ષ હરે પ્રભો ।
સમસ્તકામ્યવરદ દેહિ મે તનયં સદા ॥ ૩૪॥

અબ્જપદ્મનિભં પદ્મવૃન્દરૂપ જગત્પતે ।
દેહિ મે વરસત્પુત્રં રમાનાયક માધવ ॥ ૩૫॥

નન્દપાલ ધરાપાલ ગોવિન્દ યદુનન્દન ।
દેહિ મે તનયં કૃષ્ણ રુક્મિણીવલ્લભ પ્રભો ॥ ૩૬॥

દાસમન્દાર ગોવિન્દ મુકુન્દ માધવાચ્યુત ।
ગોપાલ પુણ્ડરીકાક્ષ દેહિ મે તનયં શ્રિયમ્ ॥ ૩૭॥

યદુનાયક પદ્મેશ નન્દગોપવધૂસુત ।
દેહિ મે તનયં કૃષ્ણ શ્રીધરઃ પ્રાણનાયક ॥ ૩૮॥

અસ્માકં વાઞ્છિતં દેહિ દેહિ પુત્રં રમાપતે ।
ભગવન્ કૃષ્ણ સર્વેશ વાસુદેવ જગત્પતે ॥ ૩૯॥

રમાહૃદયસમ્ભાર સત્યભામામનઃપ્રિય ।
દેહિ મે તનયં કૃષ્ણ રુક્મિણીવલ્લભ પ્રભો ॥ ૪૦॥

ચન્દ્રસૂર્યાક્ષ ગોવિન્દ પુણ્ડરીકાક્ષ માધવ ।
અસ્માકં ભાગ્યસત્પુત્રં દેહિ દેવ જગત્પતે ॥ ૪૧॥

કારુણ્યરૂપ પદ્માક્ષ પદ્મનાભસમર્ચિત ।
દેહિ મે તનયં કૃષ્ણ દેવકીનન્દનન્દન ॥ ૪૨॥

દેવકીસુત શ્રીનાથ વાસુદેવ જગત્પતે ।
સમસ્તકામફલદ દેહિ મે તનયં સદા ॥ ૪૩॥

ભક્તમન્દાર ગમ્ભીર શઙ્કરાચ્યુત માધવ ।
દેહિ મે તનયં ગોપબાલવત્સલ શ્રીપતે ॥ ૪૪॥

શ્રીપતે વાસુદેવેશ દેવકીપ્રિયનન્દન ।
ભક્તમન્દાર મે દેહિ તનયં જગતાં પ્રભો ॥ ૪૫॥

જગન્નાથ રમાનાથ ભૂમિનાથ દયાનિધે ।
વાસુદેવેશ સર્વેશ દેહિ મે તનયં પ્રભો ॥ ૪૬॥

શ્રીનાથ કમલપત્રાક્ષ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૪૭॥

દાસમન્દાર ગોવિન્દ ભક્તચિન્તામણે પ્રભો ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૪૮॥

ગોવિન્દ પુણ્ડરીકાક્ષ રમાનાથ મહાપ્રભો ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૪૯॥

શ્રીનાથ કમલપત્રાક્ષ ગોવિન્દ મધુસૂદન ।
મત્પુત્રફલસિદ્ધ્યર્થં ભજામિ ત્વાં જનાર્દન ॥ ૫૦॥

સ્તન્યં પિબન્તં જનનીમુખામ્બુજં વિલોક્ય મન્દસ્મિતમુજ્જ્વલાઙ્ગમ્ ।
સ્પૃશન્તમન્યસ્તનમઙ્ગુલીભિર્વન્દે યશોદાઙ્કગતં મુકુન્દમ્ ॥ ૫૧॥

યાચેઽહં પુત્રસન્તાનં ભવન્તં પદ્મલોચન ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૫૨॥

અસ્માકં પુત્રસમ્પત્તેશ્ચિન્તયામિ જગત્પતે ।
શીઘ્રં મે દેહિ દાતવ્યં ભવતા મુનિવન્દિત ॥ ૫૩॥

વાસુદેવ જગન્નાથ શ્રીપતે પુરુષોત્તમ ।
કુરુ માં પુત્રદત્તં ચ કૃષ્ણ દેવેન્દ્રપૂજિત ॥ ૫૪॥

કુરુ માં પુત્રદત્તં ચ યશોદાપ્રિયનન્દન ।
મહ્યં ચ પુત્રસન્તાનં દાતવ્યં ભવતા હરે ॥ ૫૫॥

વાસુદેવ જગન્નાથ ગોવિન્દ દેવકીસુત ।
દેહિ મે તનયં રામ કૌસલ્યાપ્રિયનન્દન ॥ ૫૬॥

પદ્મપત્રાક્ષ ગોવિન્દ વિષ્ણો વામન માધવ ।

દેહિ મે તનયં સીતાપ્રાણનાયક રાઘવ ॥ ૫૭॥

કઞ્જાક્ષ કૃષ્ણ દેવેન્દ્રમણ્ડિત મુનિવન્દિત ।
લક્ષ્મણાગ્રજ શ્રીરામ દેહિ મે તનયં સદા ॥ ૫૮॥

દેહિ મે તનયં રામ દશરથપ્રિયનન્દન ।
સીતાનાયક કઞ્જાક્ષ મુચુકુન્દવરપ્રદ ॥ ૫૯॥

વિભીષણસ્ય યા લઙ્કા પ્રદત્તા ભવતા પુરા ।
અસ્માકં તત્પ્રકારેણ તનયં દેહિ માધવ ॥ ૬૦॥

ભવદીયપદામ્ભોજે ચિન્તયામિ નિરન્તરમ્ ।
દેહિ મે તનયં સીતાપ્રાણવલ્લભ રાઘવ ॥ ૬૧॥

રામ મત્કામ્યવરદ પુત્રોત્પત્તિફલપ્રદ ।
દેહિ મે તનયં શ્રીશ કમલાસનવન્દિત ॥ ૬૨॥

રામ રાઘવ સીતેશ લક્ષ્મણાનુજ દેહિ મે ।
ભાગ્યવત્પુત્રસન્તાનં દશરથાત્મજ શ્રીપતે ॥ ૬૩॥

દેવકીગર્ભસઞ્જાત યશોદાપ્રિયનન્દન ।
દેહિ મે તનયં રામ કૃષ્ણ ગોપાલ માધવ ॥ ૬૪॥

કૃષ્ણ માધવ ગોવિન્દ વામનાચ્યુત શઙ્કર ।
દેહિ મે તનયં શ્રીશ ગોપબાલકનાયક ॥ ૬૫॥

ગોપબાલ મહાધન્ય ગોવિન્દાચ્યુત માધવ ।
દેહિ મે તનયં કૃષ્ણ વાસુદેવ જગત્પતે ॥ ૬૬॥

દિશતુ દિશતુ પુત્રં દેવકીનન્દનોઽયં
દિશતુ દિશતુ શીઘ્રં ભાગ્યવત્પુત્રલાભમ્ ।
દિશતુ દિશતુ શ્રીશો રાઘવો રામચન્દ્રો
દિશતુ દિશતુ પુત્રં વંશવિસ્તારહેતોઃ ॥ ૬૭॥

દીયતાં વાસુદેવેન તનયો મત્પ્રિયઃ સુતઃ ।
કુમારો નન્દનઃ સીતાનાયકેન સદા મમ ॥ ૬૮॥

રામ રાઘવ ગોવિન્દ દેવકીસુત માધવ ।
દેહિ મે તનયં શ્રીશ ગોપબાલકનાયક ॥ ૬૯॥

રાઘવ! ગોવિન્દ! દેવકીપુત્ર! માધવ! શ્રીપતે!

(ગોપબાલકનાયક શ્રીકૃષ્ણ! મુઝે પુત્ર દીજિયે) ॥ ૬૯॥

વંશવિસ્તારકં પુત્રં દેહિ મે મધુસૂદન ।
સુતં દેહિ સુતં દેહિ ત્વામહં શરણં ગતઃ ॥ ૭૦॥

મ્રાર્દનાખ્ય વિપ્રસ્ય ભગવદ્દર્શનવિષયક ઉત્કણ્ઠા ।
અમાભીષ્ટસુતં દેહિ કંસારે માધવાચ્યુત ।
સુતં દેહિ સુતં દેહિ ત્વામહં શરણં ગતઃ ॥ ૭૧॥

ચન્દ્રાર્કકલ્પપર્યન્તં તનયં દેહિ માધવ ।
સુતં દેહિ સુતં દેહિ ત્વામહં શરણં ગતઃ ॥ ૭૨॥

વિદ્યાવન્તં બુદ્ધિમન્તં શ્રીમન્તં તનયં સદા ।
દેહિ મે તનયં કૃષ્ણ દેવકીનન્દન પ્રભો ॥ ૭૩॥

નમામિ ત્વાં પદ્મનેત્ર સુતલાભાય કામદમ્ ।
મુકુન્દં પુણ્ડરીકાક્ષં ગોવિન્દં મધુસૂદનમ્ ॥ ૭૪॥

ભગવન્ કૃષ્ણ ગોવિન્દ સર્વકામફલપ્રદ ।
દેહિ મે તનયં સ્વામિંસ્ત્વામહં શરણં ગતઃ ॥ ૭૫॥

સ્વામિંસ્ત્વં ભગવન્ રામ કૃષ્ણ માધવ કામદ ।
દેહિ મે તનયં નિત્યં ત્વામહં શરણં ગતઃ ॥ ૭૬॥

તનયં દેહિ ગોવિન્દ કઞ્જાક્ષ કમલાપતે ।
સુતં દેહિ સુતં દેહિ ત્વામહં શરણં ગતઃ ॥ ૭૭॥

પદ્માપતે પદ્મનેત્ર પ્રદ્યુમ્નજનક પ્રભો ।
સુતં દેહિ સુતં દેહિ ત્વામહં શરણં ગતઃ ॥ ૭૮॥

શઙ્ખચક્રગદાખડ્ગશાર્ઙ્ગપાણે રમાપતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૭૯॥

નારાયણ રમાનાથ રાજીવપત્રલોચન ।
સુતં મે દેહિ દેવેશ પદ્મપદ્માનુવન્દિત ॥ ૮૦॥

રામ રાઘવ ગોવિન્દ દેવકીવરનન્દન ।
રુક્મિણીનાથ સર્વેશ નારદાદિસુરાર્ચિત ॥ ૮૧॥

દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં શ્રીશ ગોપબાલકનાયક ॥ ૮૨॥

મુનિવન્દિત ગોવિન્દ રુક્મિણીવલ્લભ પ્રભો ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૮૩॥

ગોપિકાર્જિતપઙ્કેજમકરન્દાસક્તમાનસ ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૮૪॥

રમાહૃદયપઙ્કેજલોલ માધવ કામદ ।
મમાભીષ્ટસુતં દેહિ ત્વામહં શરણં ગતઃ ॥ ૮૫॥

વાસુદેવ રમાનાથ દાસાનાં મઙ્ગલપ્રદ ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૮૬॥

કલ્યાણપ્રદ ગોવિન્દ મુરારે મુનિવન્દિત ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૮૭॥

પુત્રપ્રદ મુકુન્દેશ રુક્મિણીવલ્લભ પ્રભો ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૮૮॥

પુણ્ડરીકાક્ષ ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૮૯॥

દયાનિધે વાસુદેવ મુકુન્દ મુનિવન્દિત ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૯૦॥

પુત્રસમ્પત્પ્રદાતારં ગોવિન્દં દેવપૂજિતમ્ ।
વન્દામહે સદા કૃષ્ણં પુત્રલાભપ્રદાયિનમ્ ॥ ૯૧॥

કારુણ્યનિધયે ગોપીવલ્લભાય મુરારયે ।
નમસ્તે પુત્રલાભાર્થં દેહિ મે તનયં વિભો ॥ ૯૨॥

નમસ્તસ્મૈ રમેશાય રુક્મિણીવલ્લભાય તે ।
દેહિ મે તનયં શ્રીશ ગોપબાલકનાયક ॥ ૯૩॥

નમસ્તે વાસુદેવાય નિત્યશ્રીકામુકાય ચ ।
પુત્રદાય ચ સર્પેન્દ્રશાયિને રઙ્ગશાયિને ॥ ૯૪॥

રઙ્ગશાયિન્ રમાનાથ મઙ્ગલપ્રદ માધવ ।
દેહિ મે તનયં શ્રીશ ગોપબાલકનાયક ॥ ૯૫॥

દાસસ્ય મે સુતં દેહિ દીનમન્દાર રાઘવ ।

સુતં દેહિ સુતં દેહિ પુત્રં દેહિ રમાપતે ॥ ૯૬॥

યશોદાતનયાભીષ્ટપુત્રદાનરતઃ સદા ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૯૭॥

મદિષ્ટદેવ ગોવિન્દ વાસુદેવ જનાર્દન ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૯૮
નીતિમાન્ ધનવાન્ પુત્રો વિદ્યાવાંશ્ચ પ્રજાયતે ।
ભગવંસ્ત્વત્કૃપાયાશ્ચ વાસુદેવેન્દ્રપૂજિત ॥ ૯૯॥

યઃ પઠેત્ પુત્રશતકં સોઽપિ સત્પુત્રવાન્ ભવેત્ ।
શ્રીવાસુદેવકથિતં સ્તોત્રરત્નં સુખાય ચ ॥ ૧૦૦॥

જપકાલે પઠેન્નિત્યં પુત્રલાભં ધનં શ્રિયમ્ ।
ઐશ્વર્યં રાજસમ્માનં સદ્યો યાતિ ન સંશયઃ ॥ ૧૦૧॥

ઇતિ  શ્રીમહાભારતે ખિલભાગે હરિવંશે શ્રીલક્ષ્મીકેશવસંવાદે
શ્રીસન્તાનગોપાલસ્તોત્રં સમ્પૂર્ણમ્ ।

(This stotra is given at the end of the Purana,
after the Harivamsha Maahaatmyam)

Encoded by Anuradha
Proofread by PSA Easwaran

*Santanagopala Stotram*
pdf was typeset on January 22, 2023

Please send corrections to *sanskrit@cheerful.com*